2026 **MANYC403/26**

न्यायदर्शनम्

MANYC403

व्याप्तिविमर्शः - 4

पूर्णाङ्काः – 80

समयः घण्टात्रयम्

संक्षिप्तोत्तराणि प्रदेयानि - 1×10=10

1. सिद्धान्तलक्षणे कस्य अभावस्य चर्चा मुख्यतया कृता?
2. 'लक्षणम्' इति पदस्य कोऽर्थः?
3. प्राचीनमते ध्वंसाधिकरणे अत्यन्ताभावः तिष्ठति न वा?
4. को नाम उपाधिः?
5. जगदीशतर्कालङ्कारः कस्य देशस्य निवासी आसीत्?
6. अवच्छेदकता कतिविधा?
7. प्रमेयाश्रयवान् धूमात् इत्यत्र साध्यतावच्छेदकं किम्?
8. सिद्धान्तलक्षणघटकं प्रथमं 'यत्' पदं किमर्थकम्?
9. अतिव्याप्तिः का?
10. विपक्षः कः?

अधोलिखितानां पञ्चानां टिप्पणी विधेया- 5×6=30

11. तत्त्वचिन्तामणिः
12. जगदीशभट्टाचार्यः
13. अन्योन्याभावः
14. विशिष्टबुद्धिः
15. एकधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिव्यक्तीनां भेदेऽप्यैक्यम्।
16. द्रव्ये संयोगसामान्याभावे मानाभावः
17. वृत्तिनियामकसंसर्गविचारः

केचन चत्वारः समाधेयाः 10×4=40

18. असमानाधिकरणान्तपदोपादानप्रयोजनं यथाग्रन्थं प्रतिपादयत।
19. प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वविचारं विवेचयत।
20. महाकालत्वहेतुकाव्याप्त्युद्भावनं यथाग्रन्थं निरूपयत।
21. नव्यमते अव्याप्यवृत्तिसाध्यकस्थले दोषमुद्भाव्य लक्षणस्य समन्वयः प्रतिपादनीयः।
22. सिद्धान्तलक्षणे प्रतियोगितावच्छेदकावच्छिन्नस्य असामानाधिकरण्यं लक्षणे कुतो निवेशितम्।
23. न्यायशास्त्रीयपरम्परायां सिद्धान्तलक्षणग्रन्थस्य महत्त्वं निरूपयत।

****